॥संध्याविधि प्रारंभ॥

ध्या
१

श्रीगणेशायनमः॥ ॥अथ प्रातःसंध्याप्रयोगः॥ ॥ॐ ऋग्वेदाय स्वाहाः॥ ॐ यजुर्वेदाय स्वाहाः सामवेदाय स्वाहाः ॐ
अथर्ववेदाय नमः॥ ॥ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्॥ भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात्॥ ऋतं सत्यं चा
भीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्॥ दिवञ्च पृथि
वीं चान्तरिक्षमथो स्वः इति मंत्रेणाचामेत्॥ अंगुष्ठमूलेन मुखमार्जनं। अंगुष्ठतर्जनीभ्यां मुखस्पर्शः ताभ्या
मेव नासिकास्पर्शः॥ अंगुष्ठमध्यमाभ्यां चक्षुर्द्वयस्पर्शः। श्रोत्रं स्कंधे नाभौ हृदये शिरसि। शिखायां। पृथी
मेतलछन्दः पृथिवीदेवता निजासने विनियोगः॥ पृथ्वि त्वया धृता लोका देवि विष्णुना धृता॥ त्वं च धारय मा
नित्यं पवित्रं कुरु चासनं॥ इति कुशोत्तरासने उपविश्य। विष्णुप्रणम्य आचम्य प्रात सकलदुरितक्षयाय ब्र
ह्मावाप्त्ये प्रातः संध्योपासनमहं करिष्ये॥ इति कुशादाय॥ ॐ भूः पुनातु ॐ भुवः पुनातु ॐ स्वः पु
नातु। ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् पुनातु॥ ॐ भूर्भुवः स्वरिति भूमौ ज

लं क्षिपेत्॥ सावित्र्याच शिखास्पर्शः ॐ अंगुष्ठाभ्यां नमः॥ ॐ भुवः तर्जनीभ्यां नमः॥ ॐ स्वः मध्यमाभ्यां नमः
ॐ तत्सवितुर्वरेण्यं अनामिकाभ्यां नमः॥ ॐ भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः॥ ॐ धियो यो नः प्र
चोदयात्॥ करतलकरपृष्ठाभ्यां नमः॥ ॐ भूः हृदयाय नमः॥ ॐ भुवः शिरसे स्वाहाः॥ ॐ स्वः शिखायै वौ
षट्॥ ॐ तत्सवितुर्वरेण्यं कवचाय हुम्॥ ॐ भर्गोदेवस्य धीमहि नेत्रत्रयाय वौषट्॥ ॐ धियो यो
नः प्रचोदयात् अस्त्राय फट्॥ ॥ॐ भूः नाभौ ॐ हृदये ॐ शिरसि॥ ॐ भूः पादयोः॥ ॐ भुवः जान्वोः॥ ॐ महः हृ
दये। ॐ जनः कण्ठे ॐ तपः मुखे ॐ सत्यं शिरसि॥ ॥गायत्री अक्षमालाञ्च साक्षात्सकमण्डलुं॥ रक्तवस्त्रां
चतुर्वक्त्रां हंसवाहनसंस्थितां॥ ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीं॥ ऋग्वेदकृतोत्संगां
वीणापुस्तकधारिणीं॥ आवाहयाम्यहं देवीं गायत्रीं सूर्यमण्डलात्॥ आगच्छ वरदे देवि त्र्यक्षरे ब्र
ह्मवादिनि॥ ॥गायत्रिच्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते॥ ॐ कारस्य ब्रह्मा ऋषिर्गायत्री छन्दः पर

ग्मी ग्न्यादेवता सर्वकर्मारंभे विनियोगः ॥ सप्त व्याहृतीनां ब्रह्म ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्ज
गत्यश्छंदांस्यग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणायामे विनि
योगः ॥ ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्रीछंदः सविता देवताग्निर्मुखमुपनयने प्राणायामे विनियो
गः ॥ ॐ शिरसः प्रजापतिऋषिर्गायत्रीछंदो ब्रह्माग्निवायुसूर्या देवता यजुः ॥ प्राणायामे विनि-
योगः ॥ इति ऋष्यादिकं स्मृत्वा बद्धासनः संमीलितनयनो मौनी प्राणायाममंत्रमुदीयेत ॥ तत्र वा
योरादानकाले पूरकनामा प्राणायामः स नवश्यामं चतुर्भुजं ब्रह्माणं हृदि ध्यायेत् ॥ त्यागकाले रेचक
स्तत्र [illegible] त्रिनेत्रं शिवं ललाटे ध्यायेत् ॥ त्रिःस्वेते कुंभिर्मंत्राभ्यासः प्राणायाममंत्रः ॥ ॐ भूः ॐ भुवः ॐ
स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोद
यात् ॥ ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ ॐ सूर्यश्चेति ब्रह्मा ऋषिः प्रकृतिश्छंदः सूर्यो २ग

देवता अपामुपस्पर्शने विनियोगः ॥ ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं म
नसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योति
षि जुहोमि स्वाहा ॥ इति प्रातराचामेत् ॥ ॐ आपः पुनंत्विति विष्णुऋषिरनुष्टुप् छंद आपो देवता अपामुपस्पर्शने विनियोगः ॥
ॐ आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु मां ॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम ॥
सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा ॥ इति मध्याह्ने आचामेत् ॥ ॐ अग्निश्च मेति रुद्र ऋषिः प्रकृतिश्छंदो
ऽग्निर्देवता अपामुपस्पर्शने विनियोगः ॥ ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पाप
मकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सत्ये
ज्योतिषि जुहोमि स्वाहा ॥ इति सायमाचामेत् ॥ ॐ आपो हि ष्ठेत्यादि ऋचत्रयस्य सिंधुद्वीप ऋषिर्गायत्री छंद आपो देवता
मार्जने विनियोगः ॥ आपो हि ष्ठा मयो भुवः ॐ ता न ऊर्जे दधातन ॥ ॐ महे रणाय चक्षसे ॥ ॐ यो वः शिवतमो रसः ॐ

तस्य भाजयतेह नः ॥ ॐ उशतीरिव मातरः ॥ ॐ तस्मा अरं गमाम वः ॥ ॐ यस्य क्षयाय जिन्वथ ॐ आपो जनयथा च नः ॥ सुमित्रि
या न इति मन्त्रे प्रजापति ऋषिरापो देवता यजुश्छन्द आदान प्रक्षेपणे विनियोगः ॥ ॐ सुमित्रिया न आप ओषध
यः सन्तु इत्यपोञ्जलिनादाय दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति द्वेष्यं प्रति जलं निक्षिपेत् ॥
द्रुपदादिवेति कोकिलराजपुत्र ऋषिरनुष्टुप् छन्द आपो देवता सौत्रामण्यवभृथे स्नाने विनियोगः ॥ ॐ द्रु
पदादिव मुमुचानः स्विन्नः स्नातो मलादिव ॥ पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः इति मन्त्रेणाकारस्यं ज
ले शिरसि निक्षिपेत् ॥ अघमर्षणस्याघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तो देवता अश्वमेधावभृथ
स्नाने विनियोगः ॥ करस्य जलस्य नासिकायां संयोज्य पूर्वोक्तया ऋतं च स्यादि वाम भागेऽभिमन्त्र्य भूमौ निक्षिपेत्
ॐ अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप् छन्द आपो देवता आचमने विनियोगः ॥ ॐ अन्तश्चरसि भूतेषु गु
हायां विश्वतोमुखः ॥ त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतमित्यनेनाचामेत् ॥ ततः स्थाय पुष्पा राम ३

मिश्रं जलं हस्ते कृत्वा सूर्याभिमुखः सूर्यायाञ्जलिं दद्यात् ॥ प्रातःसन्ध्यामध्ये हि उत्थाय सायं चोपविश्य त्वाः वक्ष्यमाणैश्चतुर्भिर्मन्त्रैः
सूर्यस्योपस्थानं कुर्यात् प्रातःसायं च मुकुलितकरः मध्याह्ने तु ऊर्ध्वबाहुः मुकुलितप्रत्येक हस्ते भूमौ लग्नो कारस्य सूर्यं ध्याय
न्नुपतिष्ठेत् ॥ एभिर्मन्त्रैः उद्वयमित्यस्य हिरण्यस्तूप ऋषिरनुष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ उद्व
यं तमसस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ उदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्यो देवता सू
र्योपस्थाने विनियोगः ॥ ॐ उदु त्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यम् ॥ चित्रमित्यस्य कौत्स ऋषिस्त्रिष्टुप्
छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी
अन्तरिक्षं ॐ सूर्य आत्मा जगतस्तस्थुषश्च ॥ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरक्षरातीत पुर उष्णिक् छन्दः सूर्यो देवता सू
र्योपस्थाने विनियोगः ॥ ॐ तच्चक्षुर्देवता ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः
शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ तेजोऽसीति देवा ऋषयः ॐ
देवता गायत्री छन्दो गायत्र्यावाहने विनियोगः ॥ ॐ तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनम्

सीति गायत्री मावालतुरीयस्य विमल ऋषिर्गायत्री छन्दः परमात्म देवता मोक्ष विनियोगः॥ गायत्र्येकपदी द्विपदी त्रिपदी च
चतुष्पदसि नहि पद्यसे। नमस्ते तुरीयाय दर्शिताय पदाय परोरजसे सावदो मा प्रापत॥ तत्सवितुरिति विश्वामित्र ऋषि
र्गायत्री छन्दः सविता उपनयने विनियोगः॥ मुक्तो वर्णः अग्निर्मुखं ब्रह्मा शिरः विष्णुर्हृदयं त्रैलोक्य चरणाय पृथ्वी कुक्षिः सांख्यो
[illegible] गोत्रजात्यं व ध्यात्वा। प्राणवायुहृति पृथ्वीं अन्ते च प्रणान सहितं गायत्रीं सप्ताहितं मनाजपेत्। विश्वतश्चक्षुरि
ति सौवन ऋषिस्त्रिष्टुप् छन्दो विश्वकर्मा देवता उपस्थाने विनियोगः॥ विश्वतश्चक्षुरिति एकं चकोरथो य
स्यदिवाकरस्य कम्हं छितेः॥ समभ्यवतु सम्प्रीतः पदस्ते दिवाकरः॥ इति प्रदक्षिणां स्त्यापविशेत देवागातुवि
दो गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः॥ अस्यान्ते प्रातःसंध्यागम्हते गायत्रीं जपेत् ब्रह्मस्वरू
पी सविता आयता उत्तरे शिखरे जाता भूम्यां पर्वतवासिनी ब्रह्मणा समनुज्ञाता गच्छ देवि यथासुखं॥॥ रा ग
इति प्रातःसंध्या समाप्तं शुभमस्तु॥ इति संवत् १९३३ साल मिती आषाढ वदि ८ रोज प्रागदत्त [illegible] लिखितम्